# Siddha Gita

# સિદ્ધગીતા

## Document Information

Text title : siddhagItA

File name : siddhagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : vAsiShThamahArAmAyaNe mokShopAyeShUpashamaprakaraNe

Latest update : March 2, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# સિદ્ધગીતા

અસ્ત્યસ્તમિતસર્વાપદુદ્યત્સમ્પદુદારધીઃ ।
વિદેહાનાં મહીપાલો જનકો નામ વીર્યવાન્ ॥ ૧॥

કલ્પવૃક્ષોઽર્થિસાર્થાનાં મિત્રાલાનાં દિવાકરઃ ।
માધવો બન્ધુપુષ્પાણાં સ્ત્રીણાં મકરકેતનઃ ॥ ૨॥

દ્વિજકૈરવશીતાંશુર્દ્વિષત્તિમિરભાસ્કરઃ ।
સૌજન્યરત્નજલધિર્ભુવં વિષ્ણુરિવાસ્થિતઃ ॥ ૩॥

પ્રફુલ્લબાલલતિકે મઞ્જરીપુઞ્જપિઞ્જિરે ।
સ કદાચિન્મધૌ મત્તે કોકિલાલાપલાસિનિ ॥ ૪॥

યયૌ કુસુમિતાભોગં સુવિલાસલતાઙ્ગનમ્ ।
લીલયોપવનં કાન્તં નન્દનં વાસવો યથા ॥ ૫॥

તસ્મિન્વરવને હૃદ્યે કેસરોદ્દામમારુતે ।
દૂરસ્થાનુચરઃ સાનુકુઞ્જેષુ વિચચાર હ ॥ ૬॥

અથ શુશ્રાવ કસ્મિંશ્ચિત્તમાલવનગુલ્મકે ।
સિદ્ધાનામપ્રદૃશ્યાનાં સ્વપ્રસઙ્ગાદુદાહૃતાઃ ॥ ૭॥

વિવિક્તવાસિનાં નિત્યં શૈલકન્દરચારિણામ્ ।
ઇમાઃ કમલપત્રાક્ષ ગીતા ગીતાત્મભાવનાઃ ॥ ૮॥

સિદ્ધા ઊચુઃ ।
દ્રષ્ટૃદૃશ્યસમાયોગાત્પ્રત્યયાનન્દનિશ્ચયઃ ।
યસ્તં સ્વમાત્મતત્ત્વોત્થં નિઃસ્પન્દં સમુપાસ્મહે ॥ ૯॥

અન્યે ઊચુઃ ।
દ્રષ્ટૃદર્શનદૃશ્યાનિ ત્યક્ત્વા વાસનયા સહ ।
દર્શનપ્રથમાભાસમાત્માનં સમુપાસ્મહે ॥ ૧૦॥

અન્યે ઊચુઃ ।
દ્વયોર્મધ્યગતં નિત્યમસ્તિનાસ્તીતિ પક્ષયોઃ ।
પ્રકાશનં પ્રકાશ્યાનામાત્માનં સમુપાસ્મહે ॥ ૧૧॥

અન્યે ઊચુઃ ।
યસ્મિન્સર્વં યસ્ય સર્વં યતઃ સર્વં યસ્માયિદમ્ ।
યેન સર્વં યદ્ધિ સર્વં તત્સત્યં સમુપાસ્મહે ॥ ૧૨॥

અન્યે ઊચુઃ ।
અશિરસ્કં હકારાન્તમશેષાકારસંસ્થિતમ્ ।
અજસ્રમુચ્ચરન્તં સ્વં તમાત્માનમુપાસ્મહે ॥ ૧૩॥

અન્યે ઊચુઃ ।
સન્ત્યજ્ય હૃદ્ગુહેશાનં દેવમન્યં પ્રયાન્તિ યે ।
તે રત્નમભિવાઞ્છન્તિ ત્યક્તહસ્તસ્થકૌસ્તુભાઃ ॥ ૧૪॥

અન્યે ઊચુઃ ।
સર્વાશાઃ કિલ સન્ત્યજ્ય ફલમેતદવાપ્યતે ।
યેનાશાવિષવલ્લીનાં મૂલમાલા વિલૂયતે ॥ ૧૫॥

અન્યે ઊચુઃ ।
બુદ્ધ્વાપ્યત્યન્તવૈરસ્યં યઃ પદાર્થેષુ દુર્મતિઃ ।
બધ્નાતિ ભાવનાં ભૂયો નરો નાસૌ સ ગર્દભઃ ॥ ૧૬॥

અન્યે ઊચુઃ ।
ઉત્થિતાનુત્થિતાનેતાનિન્દ્રિયાહીન્પુનઃ પુનઃ ।
હન્યાદ્વિવેકદણ્ડેન વજ્રેણેવ હરિર્ગિરીન્ ॥ ૧૭॥

અન્યે ઊચુઃ ।
ઉપશમસુખમાહરેત્પવિત્રં
સુશમવતઃ શમમેતિ સાધુચેતઃ ।
પ્રશમિતમનસઃ સ્વકે સ્વરૂપે
ભવતિ સુખે સ્થિતિરુત્તમા ચિરાય ॥ ૧૮॥

ઇત્યાર્ષે શ્રીવાસિષ્ઠમહારામાયણે વાલ્મિકીયે દેવદૂતોક્તે
મોક્ષોપાયેષૂપશમપ્રકરણે સિદ્ધગીતાનામાષ્ટમઃ સર્ગઃ ॥ ૮॥

Encoded and proofread by Sunder Hattangadi

*Siddha Gita*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*